।। शिवाभ्यां नमः ।।

## ।। शिवभक्तलक्षण प्रारम्भः ।।

नाथ त्वदीयमभिधानमुपाश्रितानां
क्रोधस्मरादि क कुवृत्तिपिशाचिकाभिः।
आभिः कथं परिभवो भगवन्मनीषां
अन्तर्निषीदति भवान् खलु शूलपाणिः।। १

दर्पस्मरप्रभृतिदावविदह्यमानं
लोकं विलोक्य कृपयेश कृपां तवास्मिन्।
वाञ्छन्ति यान्ति च मुदं वयमेददापत्
त्यक्ताः किलेति शरणीकृत तावकाख्याः।। २

कायस्य हेयनिधितां मृतिरुग्जरार्त्या-
द्यानन्त्यमप्यलमवेत्य विमुक्तसर्वाः।
शम्भो चरन्ति विरुजस्त्वयि बद्धभावाः
ये सादरास्तव हि नाम्नि महानुभावाः।। ३

त्वन्नामकीर्तनवरौषधमाश्रितेऽस्मिन्
अस्मै खलु स्मरहर स्वदसे त्वमेकः।
अन्यत्तु किञ्चिदपि न स्वदते तदेतत्
आखण्डलस्य पदमस्तु विधेः पदं वा।। ४

आकाङ्क्षितुं कमलजादिभिरप्यलभ्यं
आपृच्छ्य तन्निरुपहत्यथ वर्तितुं च।
सन्मौळिलाळनपदं पदमीश ते किं
गौरीश ये त्वदभिधा नरतास्तदन्ये।। ५

एकं भवद्भजनमेव सुखं तदन्यत्
आर्त्यात्मकं सकलमेतदिति प्रबोद्धुम्।
स्थातुं च मुक्तसकलं भवदेकतानं
ईशास्त एव शिव ये तव नाम्नि सक्ताः।। ६

दुःखात्मकत्वमखिलस्य तवातिवेला-
नन्दात्मताञ्च समवेत्य झटित्यशेषम्।
त्यक्तानलार्त वपुषस्सरसीव शम्भो
त्वय्यापतन्ति समुपाश्रित तावकाख्याः।। ७

आख्यापरास्तव विभो भवदात्मकत्वं

अस्याखिलस्य तव चित्सुखरूपताञ्च।

आबुद्ध्य बद्धहृदयास्तव शर्म विन्द-

न्त्यन्तः किमप्यगणित द्रुहिणादिभोगाः।। ८

द्वेष्य प्रियादि सकलं भवदीयरूपं

बुद्ध्वा त्वयि प्रणयतः प्रणयार्द्रदृष्ट्या।

पश्यन्त एतदवलम्बित तावकाख्याः

पश्यल्ललाट विचरन्ति जगत् पुनन्तः।। ९

रागादिकृद्विविधमेष महानटः खलु

आनृत्यतीत्थमिति तत्वदृशेक्षमाणाः।

क्षोभं न यान्ति दधते च मुदं स्मरन्तः

त्वद्वैभवं त्वदभिधान निबद्धभावाः।। १०

शम्भो कथं नु चतुरास्तव नाम्नि सक्ताः

शश्वत्कृतेऽप्यपद एव पराभवेऽन्यैः।

अस्तोद्यमाः प्रतिकृतावपयात्वमीषां

एषा कदार्तिरिति तेषु दयां वहन्ति।। ११

त्वन्नामधेयरसिकास्तरुणेन्दुमौळे

दुःखं न यान्ति किमपीति हि वादमात्रम्।

तेऽमी किल स्वविपदीव वहन्ति दुःखं

दृग्गोचरं व्रजति दुःखिनि जन्तुमात्रे।। १२

सर्वत्र वत्सलतया त्वदवेक्षया चो-

दारा महान्त इति धीनिगळेन मुक्ताः।

प्रेम्णा खलु त्वयि विभो तृणिताखिलार्थाः

त्वन्नामधेयरसिकाः कृतिनो जयन्ति।। १३

नाथ त्वदीक्षणवशादखिलेष्वमीषु

न क्वाप्यगौरवदृगात्मनि तु प्रकामम्।

नैच्यग्रहस्त्वयि तु रक्तिरनर्गळेति

क्वाधीतवन्त इदमादृत तावकाख्याः।। १४

अत्युन्नतिं वितरतीति यशोऽतिवेलं

अस्याश्चकास्ति शिव तावकनाम्नि सक्तेः।

आख्यायतां किमियमातनुते नितान्तं
आनम्रमेतमखिलेषु चराचरेषु।। १५
त्वन्नामकीर्तनजुषोऽनिशमेकतानाः
त्वत्सेवनं विदधतोऽपि न तत्र तृप्तिम्।
विन्दन्ति हन्त सति विघ्नलवे भवन्ति
वह्निप्रवेश इव दुस्सहतापभाजः।। १६
अस्तस्पृहं मुनिमहं समदर्शनं स-
मन्वेमि तच्चरणपद्मरजोभिलाषात्।
इत्यादि ताक्ककगिरां गिरिशास्पदं त्वत्
आख्यापराः पुनरमूनवितुं क्षमः कः।। १७
त्वद्सौहृदादि सुगुणामृतशीतळास्त्वत्
आख्यापरा इति तवेश यशोऽभिगोप्तुम्।
अस्मानपि त्वदभिधानजुषो जुषस्व
स्वच्छं यशस्तदपदे ननु मापनैषीः।। १८
क्रोधस्मराद्युपशमं त्वयि रागिताञ्च
देहीश मे न यदि मे श्वमुखेभ्य एभ्यः।
किं भेदकं त्वदभिधां मम गृह्णतोऽस्य
फल्गुस्थितिस्त्वदयशोभरहेतुरेषा।। १९
त्वन्नामकीर्तन सुधारसधारयास्त-
विच्छेदया भृशविशृङ्खलसौहितीकः।
वेद्यान्तराण्यकलयन् विचराणि सोऽहं
शान्तः कदा शशिवतंस तव प्रसादात्।। २०
मत्प्राणवल्लभ मदीयनिधे मदात्मन्
साम्ब प्रभो शिव शशाङ्कविभूषणेति।
त्वन्नामदीव्यदमृतोदधिवीचिडोळा-
न्दोळैर्विधेहि विरुजं कृपया विभो माम्।। २१

।। इति श्री श्रीधरवेङ्कटेशार्य कृतिषु शिवभक्तलक्षणं सम्पूर्णम् ।।